SyBA
27/4/18
2 to 5 pm
Pg. 3

Sanskrit -II

(30)

Q. P. Code : 35538

(3 Hours) [ Marks : 100

**N.B.** 1. **All** questions are **compulsory.**
2. **All** questions carry **equal** marks.
3. **Figures** to the right **indicate marks** to a **sub-question**.

१. केवलं **द्वौ** समूहौ अनुवदत । 10

A. i) "रूपस्य हन्त्री व्यसनं बलस्य शोकस्य योनिर्निधनं रतीनाम् ।
नाशः स्मृतीनां रिपुरिन्द्रियाणामेषा जरा नाम ययैष भग्नः ॥
पीतं ह्यनेनापि पयः शिशुत्वे कालेन भूयः परिसृप्तमुर्व्याम् ।
क्रमेण भूत्वा च युवा वपुष्मान् क्रमेण तेनैव जरामुपेतः" ॥

ii) कथं देवा गताः पूर्वममरत्वं विचक्षणाः ।
तपसा कर्मणा वापि प्रसादात् कस्य तेजसा ॥
पुरा देवासुरे युद्धे हताश्च शतशः सुरैः ।
पुनः संजीवनीं विद्यां प्रयोज्य भृगुनन्दनः ॥

B. i) अथाब्रवीद्राजसुतः स सूतं " नरैश्चतुर्भिर्ह्रियते क एषः । 10
दीनैर्मनुष्यैरनुगम्यमानो विभूषितश्चाप्यवरुद्यते च " ॥
ततः स शुद्धात्मभिरेव दैवैः शुद्धाधिवासैरभिभूतचेताः ।
अवाच्यमप्यर्थमिमं नियन्ता प्रव्याजहारार्थवदीश्वराय ॥

ii) अचिरादेव उत्सवद्वये गृहीतसहभागेन मया इदं परिवर्तनं नाट्यमयपद्धत्या अनुभूतम् । वारद्वयेऽपि ईदृशं परिवर्तनं संभाषणमाध्यमेन अवगतम् । तस्य व्यक्तिगतस्वरूपत्वेऽपि परिवर्तनविषये केचन मूलभूता अर्थाः प्रकर्षेण स्फुटीभूताः । इमे परिवर्ता मया स्वीये आयुःक्रमे अनुभूताः । तत्र आद्या घटना दीपावलीमहोत्सव-सम्बद्धा, अन्या तावत् केनापि संगीतोत्सवेन सम्बद्धा ।

C. i) अमृतार्थे महादेव मथ्यमाने महोदधौ । 10
विषमद्भुतमुद्भूतं लोकसंक्षयकारकम् ॥
त्वमेको नो गतिर्देव गीर्वाणगणशर्मकृत् ।
रक्षास्मान् भक्षसंकल्पाद् विरूपाक्ष विषज्वरात् ॥

ii) मम वयस्या अवदत्, "रेणुः अत्यन्तं श्रान्ता । महति उद्योगसंस्थाने एच्. आर्. डी. विभागे सा अध्यक्षा । दीपावलीदिनेषु तया बहूनाम् आतिथ्यं कार्यम् । तस्मात् सातिश्रान्ता विरामार्थं गोमन्तकं गता । तत्र उद्योगसंस्थानस्य अभ्यागतगृहे सा कृतनिवासा । एतत् न कस्मै अपि निवेदनीयमिति तया सूचितम् अस्ति मह्यम् ।"

TURN OVER

२. केवलं **द्वौ** परिच्छेदौ लिखत |

A. दीपावलि-उत्सवे परिवर्तनम् | 10

B. गुप्तकालीन-समाजव्यवस्था | 10

C. राजमार्गवर्णनम् | 10

३. केवलं **द्वौ** उत्तरत |

A. ससन्दर्भं स्पष्टीकुरुत - 10

i) ततोऽमृतं सुनिहितमेव चक्रिरे |

ii) तस्माद्रथं सूत निवर्त्यतां नो विहारभूमेर्न देशकाल: |

B. ससन्दर्भं स्पष्टीकुरुत - 10

i)क्रियतां दानवैः सार्धं सख्यमैत्राभिधीयताम् |

ii)अपरा एका शिरोवेदना |

C. 'प्राचीन-भारतीय-विद्यापीठानि' इति विषयमधिकृत्य विवेचनं लिखत | 10

४. केवलं **द्वौ** उत्तरत |

A. समानार्थकशब्दान् लिखत | 10

i. समर: |
ii. रिपु: |
iii. वित्तम् |
iv. जरा |
v. तुरग: |

B] **संस्कृतम्** आश्रित्य पूर्णवाक्येन उत्तरत | 10

i. कुमार: कै: सह विहर्तुम् इच्छति ?
ii. हता: देवा: किमकुर्वन् ?
iii. सिद्धार्थस्य पितु: नाम किम् ?
iv. अनाथाश्रमान् प्रोत्साहयितुं लेखिका किमकरोत् ?
v. समुद्रमन्थनप्रसङ्गे क: मन्थयष्टि: अभवत् ?

TURN OVER

C] मञ्जूषातः शब्दान् चित्वा **रिक्तस्थानानि** पूरयत | 10

( संविग्नचेता, सङ्कुचतीव, शङ्करः, इरावतः, मस्तकशूलम्, पिनाकहस्ताय )

i. नमः ------------ वज्रहस्ताय धन्विने |

ii. ------------ समुत्पन्नः गजेन्द्रश्च सुनीलवान् |

iii. मा भूत् कूमारः सुकुमारचित्तः ------------ इति मन्यमानाः

iv. श्रुत्वा च मे रोगभयं रतिभ्यः प्रत्याहतं --------- चेतः |

v. दानवस्तुपरिग्रहः पुनः ---------- |

५. टिप्पणी लिखत ( केवलं द्वे )

A. i) मौर्यकालीन-समाजव्यवस्था | ii) शुक्राचार्यः| 10

B. i) पुराणं पञ्चलक्षणम् | ii) अश्वघोषः | 10

C. i) सुधामूर्ति-महोदया | ii) वृक्षायुर्वेदः | 10

---